नं० ४३२६ – ब

शास्त्रदीपिका षष्ठाध्यायः
पर्याय सहितः
पत्राणि ४१

नं० ४३२६-घ

पूगास्त्रदीपिका षष्ठाध्यायः पर्यायसहितः

नं० ४३२६-घ 4326

पत्राणि ४७

F=41

ना.धा.२

२

॥श्रीढुंढिराजाय नमः॥ ॥ द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबंधः॥ मेदादिलक्षणैरेवमनुष्ठेयं निरूपितं॥ कोनेनाधिक्रियेतेति सं
प्रति संप्रधार्यते॥ तदुपोद्घातरूपेणात्वादावेतद्विचार्यते॥ कर्मनिर्दिष्टः पुरुषः कर्त्ता किमधिक्रियते न वा॥ सत्यधिकारे कस्य कुत्राधि
कार इति चिंतयिष्यते लक्षणमारब्धमिति तत्सिध्यर्थमधिकारसद्भावः प्रथमं प्रतिपाद्यते। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत चि
यजेत त्रया पशुकाम इत्यादिषु किं पुरुषस्याधिकारः स्वाम्यं कर्मजन्यफलभोक्तृत्वमस्ति नेति विचार्यते। तदर्थमिदं विचार्यते यं प्रत्ययो
पात्ताया भावनायाः किं धात्वर्थ एव भाव्यः प्रधानं। स्वर्गादि तु साधनतया गुणभूतं। उत काम्यमानत्वेनोपात्तः स्वर्गादिरेव भाव्य
स्तत्साधनं च धात्वर्थ इति। ततोप्येतद्विवेचनं।योत्र क्रियायाः स्वर्गकामादेश्च पुरुषस्य क्रियाकर्त्तृरूपः संबंधस्तत्र क्रियाप्रधा
नतः पुरुषो गुणतः उतो विपरीतं वेति। यदि गुणतः पुरुषस्तत्तः तस्य गुणानां च क्रियान्वेपादेव सिद्धमनूद्य स्वर्गादिद्रव्यं साध
नत्वेन विधीयते। कामयतिश्च साधनकामनानुवादः। तदयमर्थः स्वर्गसाधनत्वेन कामयमानः यजेत स्वर्गेणायागं कुर्यादित्यर्थः।
यदा स्वर्गकामेनैव समुद्दमनोध्यानवद्गुणान्तकर्त्तृविशेषणां सतीमार्गांगमुपदिश्यते इति द्वेधा पूर्वपक्षः। अथ प्रधानतः पुरुष

स्तात्तस्यात्मार्थास्वर्गादिगोचरा प्रवृत्तिः प्रत्ययेन विधीयते॥ साधनतया च याग उपदिश्यते। स्वर्गकामो यागेन कुर्यादात्मार्थां
प्रवृत्तिमिति। स्वर्गकामस्य चात्मार्था प्रवृत्तिः स्वर्गविषयैवेति स्वर्गभावनैवानेन प्रकारेणोपदिष्टा भवति। तदयमर्थः स्वर्गं यः
प्राप्नुमिच्छति स यागेन कुर्यादभिलषितं स्वर्गं चेत्स्याभिलषित इति स्वर्गं भावयेद्यागेनेत्युक्तं भवति। स्वर्गकामोद्य हराणे
तु प्रथमः पूर्वपक्षोपस्थितकतया इदमपि विंसते स्वर्गशब्दो द्रव्यवचनः प्रीतिवचनो वेति प्रीतिवचनत्वे तु तस्याः साधनत्वा
संभवाद्दत्यैतानालंबनः प्रथमः पक्षः स्यादिति॥ तत्र पूर्वः पक्षः॥ धात्वर्थस्यैव भाव्यत्वं पदश्रुत्या प्रतीयते। स्वर्गादेः खलु
वाक्येन भाव्यते। स्वर्गादेः खलु वाक्ये न श्रुतेर्वाक्यं च दुर्बलं। भूतं च स्वर्गपश्वादिद्रव्यं भव्याय कर्मणो। उपदेशेन भूताय भव्य
कर्मोपदेशाने। स्वर्गशब्दश्चंदनादिषु प्रयोगात् द्रव्यवचन इति न साधनत्वासंभवः। पश्वादेस्तु असंदिग्धमेव द्रव्यवचन
त्वं। अथवा स्वर्गादिकामनैव यागांगमिति सर्वथा यागप्रभाव्यो न तेनान्यत्र फलमसति च फलेऽधिकाराभावादनारंभ
णीयमधिकारलक्षणं॥ नन्वेवमफले कर्मणि न कश्चित्प्रवर्तेत। मा प्रवर्त्तिष्ट किं नः छिन्नं नैतावतास्य कर्यफलमुपगंतु॥

अफलस्यैव कर्मणो धर्मत्वं न सिध्यती। सेतदपि नवतु। तथा सति चोदनालक्षणो धर्म इत्युक्तं स्यात् इत्येतदपि सत्यं। तदधीनं
वसकलं शास्त्रमिति सकलशास्त्राक्षेपात् दमधिकारणमारब्धं। विधिरपि पुरुषं प्रवर्त्तयति न तु फलवत्तां गमयति। न च
प्रवर्त्तितोपि कश्चिद् अफले प्रवर्त्तत इति व्यर्थ एव विधिरिति प्राप्ते निधीयते॥ ॥पदश्रुतेर्बलीयस्त्वाद्विधिश्रुत्या हि भावना॥
अवरुद्धा न यागादिभाव्यमात्रं वितुं क्षमा।१ स्वर्गादिः कामनायोगात् फलत्वेनैवगम्यते। स्वरसात्पुरुषार्थो हि कामनाफल
गोचरः। लिङादयो विधिं भावनां चाभिदधति। तेन प्रकृत्युपात्तयाग। संबंधात्पूर्वमेव विधिसंबंधो भावनायाः प्रतीयते। प्रवर्त्त
नारूपश्च विधिः। प्रवृत्तिहेतुश्च व्यापारः प्रवर्त्तना। तच्चोदितो पुरुषार्थेन व्ययाभावेनयानसंभवतीति यागातिक्रमेण पुरुषार्थ
स्यैव भाव्यत्वं विधिश्रुतिबलादध्यवसीयते। कस्य पुनरसौ प्रवर्त्तनारूपो व्यापारः। शब्दस्येति ब्रूमः। तस्य सन्निहितत्वादन्यस्य वा
प्रतीतेः। यद्यपि शब्दस्याचेतनत्वात् इच्छादिव्यापारासंभवः तथापि तस्य व्यापारः संभवति तस्यैव यथा प्रवर्त्तनारूपत्वं संपद्यते तथा
यतितव्यं। अंशत्रयविशिष्टभावनाप्रतिपादनं चास्य व्यापारः। तत्र यदि भाव्यांशे पुरुषार्थ उपनीयते ततस्तत्प्रतिपादनं प्रवृत्तिहेतु

र्जवति नान्यथा तेन शब्दकर्तृकस्यार्थप्रतिपादनरूपस्य व्यापारस्य प्रवर्त्तनारूपत्वं संपादयितुं तद्विषयभूताया भावनायाः पु
रुषार्थत्वाभ्यत्वं निश्चीयते स्वर्गादिश्च कामनायोगात् भाव्यतया गम्यते। भाव्यविषया हि मुख्यरूपेण कामना साधनेषु तु तत्संबंध
निमित्ता गौणी। न वात्र गौण्याग्रहणे प्रमाणमस्ति। तस्माद्विधिश्रुतेः कामनायोगाच्च स्वर्गपश्वादीनामेव भाव्यत्वं। यागश्च तत्सा
धनं। प्रीतिवचनश्च स्वर्गशब्दः तामनभिधाय तद्विशिष्टद्रव्याभिधानासंभवात् द्रव्यस्वरूपमात्रे वाप्रयोगात्। अतः स्वर्गादि
कामस्य तद्भावनायां यागादि विशिष्टं विधीयते। यद्यपि च स्वर्गकामस्यार्थांतरविषया प्रवृत्तिः शेषत्वेन संभवति तथापि पुरुषार्थांतरशेष
त्वस्यापि संभवात् स्वर्गकामस्य च कदाचित्फलांतरमनिच्छतः तद्द्वेषित्वासंभवान्न स्वर्गकामार्थप्रवृत्तित्वेन निर्दिश्यते। यैव हि स्व
र्गकामेषु पशेषत्वेनानुस्यूता पुरुषार्थांतरेभ्यश्च व्यावृत्ता स्वर्गप्रवृत्तिः सैव स्वर्गकामप्रवृत्तिरित्येवं विशेषणं सहते। अतः स्वर्गकामार्थ
प्रवृत्त्युपदेशात् तत्साधनत्वेन विहितो यागः स्वर्गसाधनत्वेनैव विहितो भवति। फलसाधने [illegible] व कर्मति फलभागिनः पुरुषस्य सिद्धो
धिकार इति लक्षणमारब्धव्यं॥१॥ फलार्थित्वात्कर्मणः शास्त्रं सर्वाधिकारं स्यात्॥ सिद्धोधिका[illegible]रे स किमनुष्ठानसमर्थानाम समर्थानां

२ ऋषि वीथबधिरपंगुमूकदेवैतिरश्चामपि। किंवासमर्थानांमनुष्याणामितिसंशयः। तत्रयदियथाधिकारमंगविनियोगः ततः सर्वेषां
अथयथाविनियोगमधिकारः ततः समग्रानुष्ठानसमर्थानामेव। तत्रप्रधानवाक्येनसर्वेषांमधिकारधीः। जायतेतदधीनांगवा
क्यानामुपवर्णनं दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिप्रधानवाक्येनस्वर्गकामाधिकारेकर्मावगतेतदनुसारीति। अंगवाक्यानिन
3 तसंकोचायालंमतश्चपंगुर्षमेतंप्रत्याज्यावेक्षणविधिरचक्षुष्मतश्चविष्णुक्रमाभावात्रअहितमेवफलसाधनं। एवंबधिरस्यवावनर
हितंमूकस्यमंत्रोच्चारणरहितं। पंगोश्चविष्णुक्रमणरहितमितिसर्वेषामपिनामंगाक्यांगरहितकर्मानुष्ठानात् सिद्धाधिकारः
स्यादेवमर्थिनांतिरश्चांतुसांपरायिकफलकामनाभावात्कथमधिकारशंका॥ तेषामपिचतुर्दश्युपवासादिदर्शनादस्त्येवादृष्टा
र्थितेतिमन्यते॥ ॥अत्रोच्यते॥ ॥नैवाज्यावेक्षणादीनीपुरुषप्रतिपादना॥ यतोसमर्थस्तत्रअन्यैकर्म कृत्वाधिकारभाक्॥ पुरुषप्रति
३ हिविधीयमानमसमर्थंप्रत्यविहितत्वादनंगमेवेति तंकृतमेवकर्मविगुणीसमग्रंफलंसाधयेत्। कर्तुप्रतिविधिस्तेषां तादृशां नैव
त्वानुवन्। कृत्वाफलमवाप्नोति ततोन्यस्यानधिक्रिया। नहिस्वातंत्र्येणांगवाक्यानिपुरुषैः संबध्यंते। प्रधानवाक्यशेषत्वान्नेषां त

यत्केन तु प्रधानवाक्येन तदंगयुक्तेः क्रतुः पुरुषैः संयुज्यमानोऽसमर्थानपहाय समर्थान्प्रति विज्ञायते। अतो यस्य क्रतुरेवावि
हितो न लाभ्याविशेषणामेवाविहितमितरश्चविहितमितिमंतव्यं॥ न च प्रधानवाक्यविरोधात्सर्वाधिकारनिश्चयः॥ विशेषाभावा
द्धि सर्वाधिकारः स्यात्। अस्ति चात्र विशेषो गोपसंहारसामर्थ्यं। अतः समर्थानामेवाधिकारः। यत्र तु प्रधानवाक्यविरोधो यावज्जी
वादौ तत्र जन्मवत्येव यथाशक्ति प्रयोगादपि फलमितिवक्ष्यते। तदविरोधे तु सर्वांगयुक्तस्यानुष्ठानादेव फलं। तिरश्चां तु प्रधानमात्रे
प्यसामर्थ्यान्न कश्चिदधिकारः॥ कार्षीणीत्वनादौ संसारे पूर्वपूर्वजन्मादिवरणासंभवात् अस्त्येवाधिकार इत्यप्युदाहरणम
नादर्त्तव्यं। देवानांवाऽमोद्देशेन त्यागासंभवाद्विग्रहाभावाद्वा शास्त्रेरनधिकारः॥२॥ लिंगविशेषनिर्देशात्पुंयुक्तमैतिशायनः॥॥ इदानीं
किं पुंस एवाधिकार उत स्त्रिया अपीति संशयः। तत्र पुंल्लिंगनिर्देशात्पुंस एवाधिकारिता। प्रकृत्यर्थेन या लिंगसंख्यावन्नाविवक्षितं॥ विशे
षणस्य हि संख्यायाग्रहाधिकरणोऽविवक्षितत्वमुक्तं। लिंगं तु प्रातिपदिकार्थग्रहवद्विवक्षितः॥ उद्देश्योऽपि फलकामो विवक्षितलिंगः
पुमानेव स्यात्। अद्रव्यत्वाच्च स्त्रिया द्रव्यसाध्यात्मकयागानुष्ठानासंभवादननुष्ठाने वाधिकारासंभवादनधिकारः। भार्या पुत्रश्च दासश्च

त्रप एवाधनास्मृता इति स्मरणादतः पुंस एवाधिकारः॥ उच्यते। प्रकृत्यर्थोपि खल्वेतदुद्देश्यस्य विशेषणं। संख्यया तुल्यनीतित्वान्न वि
वक्षा उपपद्यते। ग्रहस्तूद्देश्यत्वाद्विवक्षितो न प्रातिपदिकार्थत्वात्। लिंगं तु प्रातिपदिकार्थोप्युद्देश्यविशेषणत्वादविवक्षितं॥ वाक्यभेदप्र
संगात्। अनपेक्षितपरिच्छेदत्वाद्वोद्दिश्यमानस्य। न वायं प्रातिपदिकार्थो विभक्तिविकाराणां टाबादीनां वान्वयव्यतिरेकाभ्यां लिंगाभि
धायित्वात्। अतः संख्यावदविवक्षितमिति तन्निपा अप्पाद्धिकारः न चाद्रव्यत्वमस्याः कर्तनादिभिरर्जनसंभवात् पित्रादिदत्तसंभवाद्वा
यादिसंभवाद्वा। उक्तं भावदुहित्रेत्यादिस्मरणात्। पत्न्यार्जितस्य चान्यसाधारणत्वात्। धर्मे चार्थे च नातिचरितव्या। पाणिग्रहणाच्च
सहत्वं कर्मसु तथा पुत्रपफलेषु द्रव्यपरिग्रहेषु चेत्यादिवचनात्। अयं यज्ञः पत्नीवद्वानित्यादिमंत्रवर्णाच्च स्वयमेव स्वत्वाधिकारः॥ पत्नी
त्वाद्वस्य स्वामित्ववचनात्॥ भार्या पुत्रश्चेति वचनं तु बहुश्रुतिस्मृतिविरुद्धत्वादस्वातंत्र्यपरं व्याख्येयं॥२॥ स्वतंत्रस्तु वचनादेककर्मी व
स्यात्॥ सिद्धे द्वयोरधिकारे किं दंपती पृथक्कुर्यातां उत सहेति चिंतायामाख्यातोपात्तायाः संख्याया गुणत्वात्तोपादेयकर्तृगामित्वेन
विवक्षितत्वादेकैकस्य प्रयोगप्राप्ते सहेति ब्रूमः। तथाहि कर्मसमग्रं भवतीतरथा वैगुण्यं स्यात् यजमानप्रयोगे पत्न्यवेक्षणान्वारंभादि

स्वामिपरासत्तिशब्दास्सक्ष्णो यज्ञसंयोग इति व्यक्तत्वादितः पत्नीशब्दः यज्ञस्वामिनोस्पष्टमाहेत्यर्थः ४

लोपात्ततत्प्रयोगे च यजमानावेक्षणादिलोपात् दानवर्हिर्ग्वस्तरिक्रयेण यजमानः पत्नी सा च तमुपादातुं ना कृतः। स्वामिवचनत्वात्प
त्नीयजमानशब्दयोः। स्वामिनश्चापरिक्रयणानुपपत्तेः अतोऽङ्गसाकल्याभावन्न यासहप्रयोगमध्यवस्यामः। संसृष्टं व्यत्वात्ततयोर्विभा
गप्रतिषेधाद्यनपेक्ष्यमप्यर्थत्वसंभवः। परस्परसापेक्षयोरेवाग्नीषोमयोरिव देवतात्वं दृष्टं परसोः कर्तृत्वं। कर्तृरूपैक्याद्याख्यातोपात्तैक
संख्याग्नीषोमौ देवतेति वत्सहप्रयोगेष्व विरुद्धः। तस्मात्सहप्रयोगः॥४॥ आधानं वद्वियज्ञवत्॥५॥ आधाने प्रकृते स्पक्षौ मेवसानावग्निमाद
धीयातामिति श्रुतं॥ तत्र संशयः। किमाधाने द्वौ पुमांसौ सस्त्रीकौ सह कुर्यातामुत एक इति। तत्र पूर्वत्राख्यातसंख्यायाः कर्तृरूपान्वयसि
तः॥ तेनेह कर्तृरूपस्य यजमानस्य द्विवचनाद्भवेत्॥ वसानाविति चौकारात् पुंद्वयं संप्रतीयते। द्वित्वपुंस्त्वे हि तद्वाच्ये नियम्येते वर्तेमिथः॥
यद्यपि पुंद्वयवत् स्त्रीपुंसयोरपि द्विवचनमौकारांतं दृष्टं। कुक्कुटश्च कुक्कुटी च कुक्कुटाविति तथाप्युभयाव्यभिचारात् पुंस्त्वं द्वित्वं वास्या
भिधेयं। तयोश्चाभिधेययोरसति स्त्रीसद्वितीयत्वप्रमाणे परस्परनियमात् पुमांसावेव द्वौ गम्येते। तयोश्चोत्पत्तावप्राप्तेस्तद्विधानार्थ
मेव द्विवचनं। उत्पत्तिवाक्यस्याधानविधिपरत्वेनार्थवत्वादेकवचनं निर्दिष्टमात्रार्थं भविष्यति। सोमवाद्ब्रवश्चाद्ध दक्षवाद्धइत्यस्याप्युत्पन्नः:

एकशब्दाभिधेययोर्द्वित्वपुंस्त्वयोः स्त्रीसद्वितीयत्वे हेमानाभावेनारुणैकहायन्यादिवत्परस्परनियमे संख्यया पुमानेव संख्येयो ग्राह्यो नान्यत्र संख्येये न च नान्या संख्याऽस्तीति द्वौ
पुमांसौ अत्राविधेयाविसर्थः:३

स्त्रा॰दा॰२

५ वाबूवत्वादनुवादः। मलिनत्वेन क्षौमसाधर्म्याद्भागो॥॥ तस्मात् दोपुमांसौ॥ एवंवासं तत्संनिकृष्टार्थविधानात् श्चास्यनुग्रहः क्षौमवस
न सैबंधयविधावुसंतवा कर्यस्यादितिप्राप्तं विधीयते। एकप वा। कुतः। क्षौमत्वाख्येन मुख्यः सन्मुख्यमर्थं परित्यजेत्। नाविधात्वथ
योगेनवर्त्तते रूढिसिद्धत्वात्। वसानक्षौमत्वाख्यौवतवस्यातामनेर्थकौ। द्वित्वमात्रविधायित्वात्तस्मात् क्षौमं विधीयते॥ तद्विधानेव
5 पुंद्वित्वविधानं तु नैवशक्यते। उत्पत्तिवाक्यादन्यत्र नानेकार्थविधिर्यतः। संनिकर्षश्चवत्वावस्यधर्मो न तदनुग्रहात्। प्रधानभूतत्वा
द्वार्थपरित्यागो विकल्प्यते। कर्तृरूपस्य वैकल्पितदधिष्ठानजेत्तः। युक्तं द्विवचनं यद्वदग्नीषोमौ हि देवते। अथामत्वानुवसनेयदा
क्षौमं विधीयते। वसानावादधीयातामित्येतावनुवादको। अनुवादो यथाप्राप्ति सा वस्त्रीपुंसयोर्द्वयोः। तेन प्राप्तिवत्वाच्छ्रुताविमो
तावेव वक्ष्यतः। एकएव पुमांस्तस्मादादधीत सह स्त्रिया। उत्पत्तिवाक्ये ह्येकत्वमुपादेयं विवक्षितं॥॥ तस्यावैयाकृतमाद्वीडि
लवर्यमतुल्यत्वात्। दंपत्योः सहप्रयोगः स्थितः तत्र पत्न्यवेक्षत इत्यादिषु पत्न्येवकेत्री। यजमानोन्वारभेत इत्यादिषु तूपादेय
स्य यजमानस्य विवक्षितलिंगत्वात् पुमानेव कर्त्तायेत्तु फलि सौ। स्त्रकारात्वनेनापि न व्यवस्थापितास्तेद्वयोरपि फलित्वं वर्त्तते। न तेषु दा१
अंतो
५

वितं। यानि तु ऋत्वर्थान्युपस्थानानुमंत्रणादीनि याजमान समाख्ययाय जमान कर्तृकाणि तेषु किं दंपत्योरन्यतरतः कर्तृत्व उत
पुमानेवेति विंसते। तत्र याजमानसमाख्यानं यजमानपदाद्यथा। निष्पद्यते तथैवेत द्यजमानापदादपि। तेन समाख्याना विशे
षादविशिष्टं द्वयोरूपिकर्तृत्वं। विद्वत्वाद्वा पुमानेव कुर्यादविदुषीतरा। वेदाध्ययनशून्यत्वात्प्रतिषिद्धं हि तत्स्त्रियाः। यद्यप्युपनयन
मष्टवर्षस्य संस्कार्यत्वेनाविवक्षितलिंगत्वात् स्त्रिया अपि भासते। तथाध्ययनमप्यनिर्दिष्टकर्तृकत्वात् प्रकृतमुपनीतं कर्तारमाश्र
यत् स्त्रियाऽपि स्यादित्यधिकारबुद्धिर्नवेति। तथाप्याह स्मस्त्रीणामध्ययनप्रतिषेधादविदुषी स्त्री न शक्ता कामं त्रोच्चारणं कर्तुं न च
तदन्यथानुपपत्या तस्या अपि विद्वत्ता संपादयितुं शक्यते। संपन्नविद्येन पुंसा तेषामनुष्ठानसिद्धेः। अतः पुमानेव कर्ता॥ ॥ चातुर्वर्ण्य
मविशेषात्॥ ॥ किमग्निहोत्रादिषु चतुर्णामपि वर्णानामधिकार उत पश्रूद्राणां त्रयाणामिति। तदर्थमिदं विचार्यते। किं कामश्रुति प्रयु
क्तं विद्यार्जनमुत स्वाध्यायविधिसिद्धविद्योपजीविन्यः कामश्रुतय इति। द्वेधा वात्र पूर्वः पक्षः। एकस्तावत्। स्वाध्यायाध्ययनं क्रत्वनुष्ठान
ज्ञानोपयिकतया विहितं क्रतुवर्गं क्रतुविधिभिरेव प्रयाजादिवत्प्रयुज्यते। क्रतवश्चाविशेषेण चातुर्वर्ण्यमधिकुर्वाणाः श्वतुर्वर्णामध्य

न २ य

स्त्रीशूद्रौ नाधीयातामिति २

६ यन्नैं प्रयुञ्जते। तत्रैवर्णावसंते ब्राह्मणमुपनयीतेत्यादिनिरूपनमनसंस्कारोध्ययनांगत्वेन विहितः चतुर्थस्य विध्यन्नावादनुपनी
त एवाधीत्य विद्यां लब्धाधिक्रियत इति। द्वितीयस्तु नत्वंगमध्ययनं श्रुत्याद्यभावादक्षरग्रहणादिदृष्टकार्यपरंपरया वाक्यार्थ
ज्ञानेयावदन्तं ज्ञानस्यानुष्ठानोपयिकत्वेन स्वयमेव फलत्वोपपत्तेस्तत्रैवाध्ययनं स्वविधिना विनियुज्यते। न तद्वारेणाक्रतौ तेनाधा
त्न्य नमिवा धर्मज्ञानीगं न क्रत्वंगं। अतस्तेन विनापि क्रतूनामवैगुण्यादनधीतवेदएव शूद्र उपदेशैर्वेदनात्वमनुतिष्ठन्नधिक्रियते।
क्रतवोधविशेषेण चतुरोप्यधिकुर्वाणास्त्रयाणामध्ययनविधिसिद्धविद्यत्वादियाज्ञेनं न प्रयुञ्जते। शूद्रस्य त्वन्यतः सिद्धविद्यत्वा
भावात्तद्दर्जनमपि प्रयुञ्जते। अतो यद्यपि स्वाध्यायविधिरनिर्दिष्टकर्तृकत्वात्कर्तारमपेक्षमाणः प्रकृतोपनयनसंस्कृतान् किमर्थं
वयमाचार्यसमीपमानीता इत्येवं प्रयोजनमपेक्षमाणान् ब्राह्मणादीनेव कर्तृत्वेन स्वीकुर्वंस्तेषामेवाध्ययनं विधत्ते। न शूद्रस्य
तथाप्यसावविहितेनैवाध्ययनेनोपायान्तरेण वा विद्यां लब्धाधिक्रियेतेति। सत्यमध्ययनं नांगं तत्क्रतावंगमर्थधीः। तद्वतः क्रत
वोलब्धज्ञानं तु यस्याक्षिपतीति नौ॥ क्रतुविधयोन्यथानुपपत्त्या विद्यामाक्षिपति यदा तु स्वाध्यायाध्ययनोपात्तविद्यान् द्विजन्मनो लभन्ते

तद्यातेरेवलक्ष्मात्मनोनुपपत्तिक्षयान्नवतुर्थस्यविद्यामाक्षिपति।यत्तवैवंविहितोपायसिद्धज्ञानवतएवविद्ययोधिकुर्वंतितत्
तदेवज्ञानमकर्मकालोपात्तमपिजग्निवत्स्वकेतूनामंगमितितद्द्रव्यस्यस्वार्थेघेनविद्यामर्जयतोपिनसिध्यत्यधिकारः।मंत्रवत्सु
वानधीतवेदस्यकुतोधिकारः।कुतस्तरांवानग्नेरग्निसाध्येषु।तस्मात्त्रयाणामधिकारः॥७॥त्रयाणांद्रव्यसंपन्नःकर्मत्वाद्द्रव्ये
सिद्धित्वात्॥॥किंत्रयाणामपिमध्येद्रव्यवतएवाधिकारउताद्रव्योपिकर्मार्थीनद्रव्यमर्जयित्वानुतिष्ठन्नधिक्रियतइतिसं
शये।पुरुषार्थोपात्तद्रव्यवत्तांलाभात्तेनाद्रव्यस्यतदर्जनंकर्तृत्वेनिराक्षिप्यते।अतोविद्वुषामिवद्रव्यवतामधिकारः॥
नैतत्तुल्यं।विद्याहिप्रत्यक्षविधिसिद्धत्रयाणामिलितेरेवोपपन्नाःकेतवोनभ्रद्रव्यस्याक्षिपंतीतियुक्तं।द्रव्यार्जनंतुसर्वपुरुषा
र्थद्रव्यकार्येरेवाक्षेप्तव्यंतत्राविशेषात्प्रयोजनादिवत्स्वकेतूनामपितदाक्षेपकत्वंनवार्यते॥अतोद्रव्योपिद्रव्यमर्जयित्वाकुर्या
त्॥८॥अंगहीनश्चतद्धर्मा॥॥अंगहीनोपिद्रव्यहीनवत्प्रतिसमाधानेनतत्कुर्यात्।द्रव्यहानिर्बहिरंगमाधिकारविरोधीति।अंग
हानिस्त्वंतरंगविरोधीतिविशेषाशंका।अथवाद्रव्यवदंगहीनस्यसिद्धमेवाधिकारमुत्तरविवक्षयानुवदतीत्यपुनरुक्तिः॥८॥

उत्सर्गोक्ति-प्रसंगो नान्तर

ग्रा.६।१

९ यस्यत्वप्रवृत्तिसमाधेयमंगावैकल्यं सन कथं विच्छिन्नोति वाच्यमिति तेन काम्येऽधिक्रियते। नित्येषु त्वाहिताग्निश्चेद्यथाशक्ति कुर्वन्नधि
क्रियत एव॥१०॥ आर्षेयस्य हानं स्यात्। दर्शपूर्णमासयोरार्षेयं वृणीत इति विधाय पुनः श्रुतं। एकं वृणीते द्वौ वृणीते त्रीन्वृणीते।
न चतुरो वृणीते न पंचातिप्रवृणीत इति। तत्र विचारः। किं दर्शपूर्णमासयोरेकार्षेयद्व्यार्षेययोरप्यधिकारः। उत त्र्यार्षेयस्यैवेति। तत्रा
र्षेयं वृणीत इति वरणमात्रे विहिते चतुर्णां षडादीनां च प्रतिषेधः कृतः। अथैकद्वित्रिपंचानां प्राप्तं वरणमिति तच्छ्रवणमनुवादः। अथवा क४
र्षेयं वृ[illegible]णीत इति सामान्यं यथा त्रीन्वृणीत इति अनेन तत्संख्याविशेष्यते तथैकं वृणीते द्वौ वृणीते इत्याभ्या[illegible]मपि विशेषाभावात्॥ उ
४वा भयथापि द्वित्वैकत्वयोस्त्रित्वेनाविशेषादेकं द्वौ त्रीन्पंच वरणानां निधिक्रियेते ति प्राप्ते ब्रूमः॥ ॥असंख्याकविधौ तावत्प्रतिषेधद्वयाश्रयात्ते॥
वाक्यद्वयं प्रसज्येत त्रीनित्यं न च पाक्षिकं॥ एकादित्रिविधानं चेत्ततो वाक्य[illegible]त्रयं भवेत्॥ विकल्पश्च भवेत्तस्मात्त्रित्वमेव विधीयते। एकं वृणी यं२
२न त इत्यादौ विध्यश्रवणादर्थवादं विधिः कल्प्यः। तत्र यदि वरणमात्रे विहिते चतुर्णां षडादीनां च प्रतिषेधः स्यात्ततः प्रतिषेधद्वयाश्रयणात् दी२
वाक्यद्वयं कल्प्यं स्यात्॥ त्वैकादिपक्षे च त्रयाणामभावात् त्रीनिति नित्यवत्श्रवणमुपरुध्येत। अथैकादिभिः सर्वैर्विशेष्यते तथापि संख्या

९

अत्र त्रीन्वृणीत इति श्रवणात्... स्त्रीण्यार्षेयाणि वरीतुं शक्तः सोऽधिकारी न तु यस्यार्षेय एव मानाभावात्। शक्नोति च चतुरार्षेयः पंचार्षेयश्च त्रीन्वृणानः सांगमनुष्ठातुं। न च य
स्य यावंत्यार्षेयाणि तेन तानि सर्वाणि वरीतव्यानीति मानमस्ति। त्रित्वविधानमात्रेण चरितार्थत्वात् न च नस्यात्तेनैकद्व्यार्षेययोरेवानधिकारः त्रिचतुःपंचार्षेयादीनां तु स
र्वेषामधिकार एव। त्रिवरणसंभवात्। इति तदुपसंहारसमर्थस्यैव संननोक्तो। इदं च भार्गवादिवरणपक्षे। यदा तु मानवेति वा सर्वेषामिति च नानोडकानुसारेणमनुवस
तामाश्रयणं तदेकद्व्यार्षेयाणां सर्वेषामनुवदितिसक्तदेवो वारणेनाधिकार इति ... २ वास्तुकं हि लमोचिकारस्य शाकभेदः तद्विजमयं ७

त्रयविधायवी वाक्यत्रयं कल्प्यं त्रित्वस्य च पाक्षिकत्वं तदवस्थमेव। त्रित्वमात्रविधौ त्वेकार्थविधानादेकवाक्यत्वं। तदेतद्गत्वा बुद्धित्वेक त॰१
त्वश्रवणानित्यानुवादः। चतुरादिप्रतिषेधश्चानुवाद एव। तस्मात्त्रित्वविशिष्टवरणविधानात्तदुपसंहारसमर्थस्यैवाधिकारः॥११॥ वस्व
नाद्रथकारस्याधानस्य सर्वत्रोपूत्वात्॥ वसंते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति विधाय श्रूयते वर्षासु रथकार आद
धीतेति तत्किं ब्राह्मणादीनामेव रथकारो निमित्तवर्षाविषयं उत रथकारसंज्ञकस्यावांतरवर्णस्याधानांतरविधानमिति स
त्रये द्विजातीनां विहित्वा तत्कालमात्रविधाने लाघवात्तेषामेव कालविधिर्न विदुषो वांतरवर्णस्य विशिष्टाधानविधिरि
ति प्राप्ते रूढिबलेन योगबाधादेव न बलाद्वा विदुषोऽप्यधिकारप्रतीतेर विधानात्। ऋभूणां त्वेति च मंत्रवर्णाद् ऋभुसौधन्वन
पर्यायस्यावांतरवर्णस्य रथकारस्येदमाधानं विधीयते॥१२॥ स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात्॥ रौद्रं वास्तुमयं चरुं निर्व
पेदिति प्रकृत्य श्रुतं एतया निषादस्थपतिं याजयेदिति। तत्र संशयः। किं द्विजातिरेव यो निषादानामधिपः स कर्तेति तस्यात्राधिकारः
षष्ठीसमा सएवायं उत निषाद एव यः स्थपतिस्तस्यैव कर्माधार इत्याशयमिति॥ तत्र॥ पक्षद्वये पित्राद्वयोर्योगादेव प्रवर्तते॥ तत्र षष्ठी

सभूणां त्वेत्याधानमंत्रवर्णात्सौधन्वनास्त्रभव इति च मंत्रांतरे साम्नानाधिकरण्यनिर्देशात् सानुजायत वैश्यपात्... धन्वाचार्य एव च। भोरूषश्च विजन्मा च मैत्रः स्मात्तलए नचेस्य कोऽसौ सुसौधन्व
नारव्यार थकारोऽधिकारी न तु माहिष्येण करिण्यां तु रथकारः प्रजायत इत्युक्तः। रथकारत्वाविशेषेऽपि प्रागन्यायेन मंत्रवर्णात्सौधन्वनानामेव ग्रहणादि सर्थः। इदं भिन्नाधिजक टीकाधा
नाडेल खण्य माहृदं द्विप्रधानकर्मविध्य जिदादिन स्त्यफलेन न्याय अधिकारः १४ इत्यनीयाय सारक निचाभावेन रथकारस्य क्रत्वधिकारा नोवाद... नामनुपपत्तेस्त्वन सोऽस्का
रानर्हत्वात्। आधानेऽविधिश्रवणावमात्रोपसंगात्यान्नकत्वधिकारकल्प ... विद्यमानो। अतो लौकिकाग्निगुणकप्रधानकर्मेदमाधानं रथकारस्य विधीयत इति वचनादेव
र्मिकस्य रथकारस्याधिकारः ४

८

समासस्त्वेविदुषः स्याद्धिक्रिया। आहिताग्नेश्च यदि तु कर्मधारय इष्यते। अनाहिताग्नेरप्यस्य प्रसज्येताधिकारिता। तेन षष्ठी
समासो यमिति प्राप्ते निधीयते॥ ॥निषाद पदमेवं तु स्थपतौ लक्षणां व्रजेत्। न हि षष्ठीश्रुतायेन तत्संबंधि विधिर्भवेत्। निषादपद
मेवातः षष्ठ्यर्थे लक्षयेदिदं॥ कर्मधारयपक्षे तु न काचिदपि लक्षणा॥ निषाद एव स्थपतिरतः श्रुत्या प्रतीयते। तेन श्रुतिबलाद्द्वो
नाहिताग्निश्चेत्सन्नपि। निषाद एव स्थपतिः कर्मण्यत्राधिकारभाक्॥ इति श्रीशास्त्रदीपिकायां षष्ठस्याध्यायस्य प्रथमः पादः॥ ॥१॥
उक्तार्थैकसिद्धित्वात्तस्य तस्याधिकारः स्यात्॥ अनेककर्तृकेषु कर्मसु सत्रादिकामाः सत्रमासीरन् इत्यादिषु किमेकैक
स्य कर्तृत्वं भवति उत तत्र प्रत्येकं कृत्स्नफलकामानामधिकार उत समुदायस्य कृत्स्नं फलं प्रत्येकं तु फलावयवः। ततश्च फला
वयवकामानामधिकार इति संशयः। तत्र। समुदायस्य कर्तृत्वात्तस्य कृत्स्नफलान्वयः। फलावयवयोगः स्यात्प्रत्येकं समुदायि
नां॥ यद्यपि कामपदे बहुत्वमुद्देश्यगतत्वादविवक्षितमिति कामिनः प्रधानत्वानुद्दिश्य गुणत्वेन विधीयमाने कर्मणि प्रतिप्रधानाव
र्तनेरकैकस्यैव स्वफलं साधयतीति प्रतिभाति तथाप्यारब्धानोपात्तस्य कर्तृबहुत्वस्योपरितनाधिकरणन्यायेनाविवक्षितत्वात्सहत्व

८

समुदायिभ्यः समुदायो नार्थान्तरमित्यर्थ इति भावः ५

कानिमित्तिः कर्तृत्वं । न चैकस्मिन् कर्मणि बहूनां प्रत्येकं कर्तृत्वं संभवति । एकेन कृते परस्य कर्तृत्वायोगात् । अतः समुदितानां व्यासज्यक
र्तृत्वं कर्तृगामि च फलं । अतस्तदपि समुदायस्यैव तद्दृष्टं तु समुदायिनः प्राप्नुवन्तीति अवयवकामानामधिकार इति प्राप्तेऽभिधीय
ते ॥ ॥ समुदायस्य कर्तृत्वं यद्यपि स्यात्तथापि तु । प्रत्येकमधिकारित्वात्तत्र वै च फलमाप्नुयुः । यद्यप्यवगम्यते तत्र त्रैवर्णिकी कर्तृव्यं ।
इह त्वधिकारावस्थायां साहित्यस्याविवक्षितत्वात् प्रत्येकमधिकारः प्रतीयते । कर्तृत्वं च संहतानामतः संहत्य प्रयुक्ते कर्म प्रत्येकं
फलं साधयतीत्यभ्युपगन्तव्यं न चैवमसंहता कर्तृगामित्वं । तथैव व्यासज्यवृत्तिकर्तृत्वं प्रत्येकं वृत्ति फलमिति प्रकारभेदमात्रं ॥ क
र्तृत्वमपि चैतेषां प्रत्येकमवगम्यते । कर्तृगामि बहुत्वं हि द्रव्यगाम्यन्यथा न चेत् । कर्तृबहुत्वं साक्षादभिधीयते न कर्त्राश्रय द्रव्य
बहुत्वं । व्यासज्यवर्त्तिनि च कर्तृत्वे न कर्तृणां बहुत्वं स्यात् किंतु द्रव्यमात्रस्य तत्र कर्तृबहुत्वाभिधानमनौजसं स्यात् । संभवति च लाक्षणिकं
सर्वेषां प्रत्येकं युगपत् कर्तृत्वं । पर्याये हि विरोधः स्यात् । एकेन कृतेऽपरस्य कर्तृत्वायोगात् न प्रयोगपद्ये । तस्मात्प्रत्येकमधिकारः ॥
॥१॥ प्रयोगे पुरुषश्रुतेर्यथाकामी प्रयोगे स्यात् ॥ ॥ दर्शपूर्णमासादिषु किमेको द्वौ बहवो वा कर्त्तारः । उत एक एवेति संशयः । तत्र र्थ्य स

ननु इहैवाद्येऽधिकरणे स्वर्गस्य कर्तव्यतोक्तात आह यदीति। स्वस्यान्यस्य वा स्वर्गकामइतिविशेषानुक्तेर्यागाकर्तापि फलं लभेततत आशास्त्र फलं भोक्तरीति भुज्यते | नेह यागस्य फलस्य वा अनुष्ठानं विधीयते यागं कुर्यात् यागेन वा फलमिति तत्कर्तानंतरं। किं तु यागेन स्वर्गं प्राप्नुयादित्येतावन्मात्रं ... उच्यते इत्यर्थः २
स्याशयः ४ | सकृदुच्चरितस्य प्रत्ययस्यानुवादकत्वं विधायकत्वं चेति ८
मा० ६।२

एवं वा घन्यायः प्रस्तुच्छिद्यते तत्य परितोषाद भ्रुपेत्याह ५ — फलस्य पुमर्थत्वात्तस्य प्राधान्यं न तु गुणत्वं तद्गतितद्विशेषणमविवक्षिता संख्येत्यर्थः ४

किमाख्यातोपात्ताकर्त्तृसंख्या विवक्षिता नेति विंत्यते। तत्र फलार्थिनं समुद्दिश्य कर्मणामुपदेशनात् तदुद्देश्यगामिनी संख्या
गृहवन्न विवक्षिता॥ स्यान्मतं यद्यपि कामपदगता संख्या उद्देश्यगतत्वान्न श्रुतलिंगवत् ग्रहैकत्ववद्वा विवक्षिता तथाप्याख्या
तोपात्ता संख्या विधीयमानक्रियाक्षिप्तगुणभूतकर्तृत्वे यागामित्यादि विवक्षितेति। तदसत्। अविधेयत्वात् क्रियायाः। यागेन स्वर्गमाप्नु
यादिति तावदुच्यते। नानुष्ठानं तदर्थप्राप्तौ। स्वर्गप्राप्तौ च पुंसः प्रधानत्वादविवक्षिता संख्या। यदि स्वर्गं कुर्यादित्युच्येत ततोऽन्यै
पि स्वर्गमाप्नुयात् न कर्त्तैव॥ यद्यपि स्वर्गं कुर्यादित्युच्येत तथाप्यविधेयैव क्रिया। यो हि यदिच्छति स तत् कर्मकरोतीति द्रव्येषु फ
लकामस्य फलविषया क्रिया प्राप्तैव तीव्र स्पृयेनानूद्यप्रकृतो यागादिः करणतया विधीयते। उभयोरप्यकर्त्तृसंख्या नेना
सावनुवाद्यगतत्वादविवक्षिता। नैवैकेन प्रत्ययेन फलकामस्य रागप्राप्तौ फलभावनामुद्दिश्य ताकर्तृसंख्याभावनां यागं वा
प्रत्युपादतुं शक्यते। वैरूप्यप्रसंगात्। अथ मतं। यद्यपि फलानुरक्ता क्रिया प्राप्ते न तथापि यागक्रियाया अप्राप्तत्वेन वि[illegible]त्वात्
तद्विशेषणभूता संख्या विधेयगतत्वाद्विवक्षितेति। तदयुक्तं। यद्यपि यागानुरक्ता क्रिया न प्राप्ता तथापि क्रियास्वरूपं तावत्प्राप्तमेव

आख्यातांशे अनुवादो लिङ्शेन च विधिः ६

धेय २

व

पदस्थ तितो बली यस्या समानप्रस यश्च त्याक्रिया गमेवेषेतिभा वः२

पदकृत्य यागेन स्वर्गं भावयेदित्येतावदुच्यते नानुष्ठानमिति तत्राह रागेति। प्रसयो भावनावाचीन तु प्रातिवाची। प्रयोगानुशासनयोर भावादित्यर्थः। यश्चोक्तं क्रियाविधावन्योपि स्वर्गः स्यात्तक...वेति तत्राह
पश्यति। यत्रतु सोऽर्थः शुनिर्वपेदित्यादावात्मनेपदाभाव स्तत्रोप्याधानवत् कृत्स्नो...नेपदाक्रतुरेवफलाय दिसाक्षादाधानसाध्य संस्कार रूप फलं तस्याग्निगामित्वा...धात्वर्थगामिता। यदपि ज्वलनेन पश्
नदहनप्रकाशनादितद्रूप्या धातुरनाधातुमन्तुत्वलो...नेपदेन कर्तृनियितं शक्यं। अतोग्निसाध्य कृ×ह×तु फलनियमार्थमेवात्मनेपदं। न चैवं तदेवसर्वं क्रतुफलस्य कर्तृगामित्वसिद्धेः सोमेन यजे
...वात्मनेपदवैयर्थ्य। अनग्निसाध्य गोदोहनादि गुणफलार्थत्वेन प्रधानवत्कर्तृगता...मनेपदोपपत्तेरिति भावः। यत्र हि नात्मनेपदं नचाग्निसाध्यता यथा जपादौ तत्र कर्तृगामिफलमनुमानादविशे
...वेव मिति। एवं नाक कर्तुः फलसंगति रित्यर्थः। विधिः फलस्याश्रयो...गामितायामानामिति वक्तुर्थापि उक्तं। नचैवं तत्(तं) वसर्वत्र कर्तृगामिता सिद्धेरात्मनेपदोपन्यासवैयर्थ्य। अन्वी चयनेनोपन्यास इति भावः।

तत्र विशिष्ट क्रियाविषयोपि विधिः श्रूयमाणः प्राप्ताप्राप्त विवेकेन यागानुरागमात्र परो भवति न हि फलक्रियातः क्रियां तु र
पातेनानुरज्यते सा चेत् प्रागेव। तद्विशेषणं च संख्यानसाक्षाद्यागगताप्रत्ययस्यार्थत्वात्। तस्माद् विवक्षितेति॥ अवाभिधीयते॥
रागप्राप्त फलप्राप्तिर्न साक्षाच्छब्देन बोध्यते। प्रत्ययश्च क्रियावाची न प्राप्तिं प्रतिपादयेत्। उपग्रह विशेषाच्च नाक कर्तुः फलसंगतिः॥
विधेश्चैवमतोन्यस्य न फलप्राप्ति संभवः। स्वर्गादिकाममुद्दिश्य क्रियैवेह विधीयते। यागादि युक्ता संख्या चेत न तत्त्वाद्विव
क्षिता। फलक्रिया नियोगेन न हि पुंसां फलार्थिनां। रागप्राप्तावितायषाश्शब्देन न विधीयते। अर्थिपदेन तावदर्थितामात्र
स्य तेन प्रवृत्तिः॥ आख्यातमपि यच्छब्दाद्यपबंधाभावाद्यागादि विशिष्ट भावना विधिपरमेवस्वरसादवगम्यते। ततश्चैवं स्वर्गो यः
मे स्यादित्येवं कामयते स तं यागेन भावयेदिति भावनैव सर्वविशेषणविशिष्टा फलोपायत्वेन कामिनो विधीयते। न चावश्य
मर्थिनस्तद्विषया प्रवृत्तिः प्राप्तायेन बलात्तत्रतत्रायुर्विधिर्यागाद्यनुरागमात्रपरत्वेनैवावस्थाप्यते न च फलकामः भावय न
दिदं जानाति प्रवर्त्तस्य मे स्वर्गः सिध्यति न त्वप्रवर्त्तस्य देवात्कारणान्तराद्वेति। तदज्ञानात्स्वर्गप्राप्तिमभिलषन्न तद्विषयप्रवर्त्त्य

प२

क्रियानुवादपक्षदूषण पूर्वकं मतसम्भो कद्द यो कं नहि विधिनरी तुंतर
नुवादः कामपदेनाख्यातेनचेति विकल्प्यनायदस्याह ५

शा·६।२

१२

प्रवृत्तो मध्यस्थच्छन्दस्तोपदानुवचनमस्य यागादिविशिष्टं व्यापारं विधत्ते तदा तस्येप्सितोपायतां विधिप्रामाण्यादवगम्य तत्र
प्रवर्त्तते। तस्माद्विधेयैव भावना यागादिविशिष्टा। संख्यावत्तद्विशेषणमिति विवक्षितेवलिंगं तु कामपदगतमुद्देश्यविशेष
एकदेशिमतमन्न घटूषयति २ णत्वादविवक्षितमिति विशेषः। येन तु स्वर्गकामस्यानुष्ठानमुक्तं यागस्तस्योपायत्वेन विधीयते। वेदे वा सोमयेवेत तत्कर्त्तव्यमिति
स्वयमेव हि जानन्ति वर्त्तव्यं पुरुषाः स्वदेत्यादि भाष्यवार्त्तिके यथाश्रुतग्रहणात्। भावनायाश्च विधानमाहुः। तेषामनूद्यमान विशे
दूषणांतरमाह ५ षणास्याविवक्षितत्वादिदमधिकरणं विरुध्यते। सर्ववाक्येषु च त्रिसाम विधाय गुणमात्रविधानाच्चोदिते हि न दर्शितत्वा तस्य तत्सा
आस्तामिवेतत्रा हृद मदिश्रयेत तत्सेवमनेक गुणविधानं क्वचिदपि न स्यात्। ततश्च रेवतीषु वारवन्तीयं कृत्वा पशुकामो यजेतेत्यादिषु प्राप्तभावनोद्देशेन या
गस्य रेवतीवारवन्तीयसंबन्धस्य च विधानात् गुणविधिपक्षवद्वाक्यभेदः स्यात्। न च यागविशेषणत्वे गुणानां येन तस्यैकस्य विधि
त्वस्य विधानाद्वाक्यभेदः परिह्रियेत। सर्वेषां भावनागामित्वात्। यथोक्तं धात्वर्थकारकाणां नत्वेकहायन्यादिवत्परस्परेण संबध्य
भावनासंबद्धानामुत्तरकालं परस्परोपकारित्वमिति सप्तमनवमाध्याययोर्वक्ष्यतीति। तस्माद्भावनाविधिरुक्तमेवानेकगुणविधानं प्र

संख्यावदेवतद्वि
गमभुपादेयकेत
विशेषणत्वाद्विव
क्षिततात आह लिं
गमिति। तस्माख्या
तानभिधेयत्वा
दितिभावः २

नन्वेवमप्यारंभमात्रस्य नैमित्तिकत्वान्नावश्यं समाप्तिः सिध्येदत आह न चेति। उपक्रमप्रभृत्यपवर्गान्तस्य क्रियासमूहस्याख्यातार्थत्वात् लोके व्युत्पत्तेः
समाप्तिमात्रेऽविहितत्वादेवारंभमध्ययोः सिद्धत्वादुपक्रममात्रेण च समाप्तेरलाभादनन्यलभ्यतया समाप्तेरेव शास्त्रार्थत्वाज्ञारंभमात्रेणाविहितकरणसिद्धि
सम्यर्थः। न चेयं निमित्तपदैः पूर्वाधिकरणोक्तकालो निमित्तं निमित्ते च नित्यस्य तादिति सूत्रकृतैव परिहृतत्वादुक्तमत आह न चेति दर्शपूर्णमासादौ नित्ये नित्यत्व
व्याघातान्नैमित्तिकत्वं तत्र निरस्तं। काम्येषु तु नित्यसंयोगाभावान्न नित्यसंयोगविरोधः। तेन नैमित्तिकत्वाऽविरुद्धं संपन्नः। अतः कामस्य निमित्ततया तस्मिन्नेतु
सन्ने विनष्टेऽपि नैमित्तिके कार्यग्रहणादाहर वेदस्याह अत इति ८

न केवलमनेकगुणविधिरेव भावनाविधिरपि
तः किं त्वेकगुणविधिरपीत्याह अन्यथेति
सर्वत्र विशिष्ट... भावनाविधिरेव तत्राभि
निवार्थिकोऽभिधानादिति भावः फलं तु तस्या...

स्तोतं वाधिकरणी समर्थनीयी। यथा हि यदा हि भावनारूढं विधित्वं भावनार्थत्वेनैव गृह्यते तदा यद्विशेषणविधौ सत्यवाक्यभेदः। ना विधिर्वापर
यदा तु तद्विशेषणार्थं तदानेकविशेषणयोगे सति यदर्थविधित्वं तस्यैवैकस्य विधानं नेतरस्येति वाक्यभेदः स्यादिति। अलभ्यं वेद शाः। विधि
मुच्यते सर्वत्र भावनाविध्यभिधानात्। तस्मादेदेवासौ मयैवैतत्कर्त्तव्यमिति स्वयमेव हि जानन्ति कर्त्तृपुरुषाः स देशादिभाव्यस्व ति वै भावना
रूपप्राप्त्यभिप्रायेन भावनाभिप्रायमिति व्याख्येयं। अतो भावनाया विधेयत्वात्तद्विशेषभूताकर्तृसंख्योपादेयगतत्वादिव स्यैपितादर्थ्य
क्षितेति सिद्धं ॥२॥ प्रक्रमात्तु नियम्येतारंभस्य क्रियानिमित्तत्वात् ॥ काम्यं कर्म कामार्थं न प्रक्रान्तं वीतायां फलेच्छायामवाप्ते वा फले न विभज्यते
किं नियोगतः समापनीयं नेति चिन्त्यते। तत्रानीप्सितसिध्यर्थं साधनेषु प्रवर्त्तते। सिद्धे तस्मिंस्तदिच्छायां वीतायां किं प्रवर्त्तते॥ तिभेदोक्तेः २
यदि मन्येत न फलार्थं कर्म किं तु फलकामनायां निमित्ते कर्मैव कर्त्तव्यं। तस्य हि नाख्यातापदश्रुत्यावगम्यते वाक्यात्तु कामस्य तद्व
दुर्बलं। नैवापक्रममात्रेणावोदितं कृतं भवति समाप्तेः शास्त्रार्थत्वात्। न च पूर्वाधिकरणोक्तरीत्या नित्यानित्यसंयोगविरोधः। का
म्यानां नित्यसंयोगाभावात्। ततः कामे निष्पन्ने निवृत्तेऽपि तन्निमित्तं कर्म कर्त्तव्यमिति॥ नैतदेवं। न ह्यपुरुषार्थं कर्म ज्ञायमानं भवतीत्युक्तं। नैवप

आद्याधिकरणोक्तविधिकल्पविरोधात् कर्मणो न ज्ञायमानत्वादित्याह १
तर्हि श्रुतस्य कामस्य निमित्तपर
त्वात्कामाभावे नरं ना व्यं भवतु तत्राह १

यागादेरभाव्यत्वे सन्निसन्नम्यादेरभावान्न कामनाया निमित्तता युक्तेत्याशयः १

दृष्टार्थत्वाद्गृहकर्मादिषु वैध्येव प्रवृत्तिः संभवतीति न विधिकल्पनं युक्तं । अत्रापि शास्त्रमर्थवदिति न्यायादि सर्थः ७

११ फले कामनायां हि सत्यां समापनं शास्त्रार्थः श्रुत्यनुष्ठानं संकल्पितोऽतः कामनाभावे समापनस्याशास्त्रार्थत्वान्निमित्तं मिथ्यासंकल्पे दोषश्रुतिनिमित्ताभावेन गृह्यमाणकार्यं वेदविगर्हणमनादरणीयमिति भावः २ तत्क्षणस्वविविहितत्वात् ४

लं तु न कल्पयितुं शक्यं श्रुतहान्यश्रुतकल्पनयोरन्याय्यत्वात् ॥ शिष्टविगर्हणं त्वनतत्वादनिमित्तं न च परमार्थतोऽन्तमस्ति शा
स्त्रार्थस्य संकल्पितत्वात् निवृत्तायां च कामनायामशास्त्रार्थत्वात् तस्मादसमापनीयमिति प्राप्ते ब्रूमः ॥ न हि संभावनामात्रात् श्रुतिं
कल्पयितुं क्षमा । सर्वस्मृतिषु तुल्यत्वात् प्रामाण्यप्रसंजनात् । तथा च निंदावचनं प्रायश्चित्तं च युज्यते । तस्मात् तदनुपक्रान्तं
नियोगेन समापयेत् । तैत्तिरीया हि समामनन्ति देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते । त्रैधातवीयेन यजेत न देव
ताभ्य आवृश्च्यत इति ॥ ३ ॥ लौकिकर्माणि वेदवत्ततोऽधिपुरुषज्ञानात् ॥ ॥ २ अथ गृहकर्मादि प्रक्रान्तं किमवश्यं समाप्यं नेति संशये ।
तेषामपि शास्त्रीयत्वाद्विहितमुपक्रान्तं नियमेन समापनीयमिति श्रुतिकल्पनात् देवताभ्यो वा एष आवृश्च्यत इति देवताश्रयत्वा
पारमार्थस्यावश्यसमापनीयत्वावगमात् गृहादीनामपि प्रक्रान्तानामावश्यकं समापनमिति प्राप्ते अभिधीयते । अशास्त्रादेव हि
प्राप्तिर्दृष्टार्थेषु गृहादिषु । तेन शास्त्रं न कल्प्येत पुरुषार्थ्या हि देवता । पुरुषार्थ्या हि देवता गृहप्रदेशेषु निवेश्यते । न तु गृहकर्म दे
वताश्रयं । तस्मान्न नियमः ॥ ४ ॥ प्रतिषेधेष्वकर्मत्वात् क्रिया स्यात् प्रतिषिद्धानां विभक्तत्वादकर्मणां ॥ ॥ न कलंजं भक्षयेदित्येवमादिषु

तत्र शास्त्रे सर्वस्यां दिशि खला देवता इतरास्वेता इति गृहकर्मादि देवताङ्गकमुक्तमिति भावः २

विषदिग्धशस्त्रहतपशुमांसं १

श्रुतिरिति निर्मूलतोपलक्षणं पौरुषेयत्वमुक्तं संभावनामात्रेण विगर्ह्य न मूलं श्रुतिः न कल्पयितुं युक्ता । न वा निर्मूलता कल्पयितुं युक्ता सर्वस्मृतिषु तदुपलब्धेः तेषां चापौरुषेयत्वेन तत्कल्पनायां सत्त्वं चाप्रामाण्यापत्तेरिति भावः २

देवतांगकं २

११

नेक्षेतोद्यंतमादित्यमित्यादीनि प्रजापतिव्रतानि। विश्वजिदादिवत्कल्प्यफल इत्यन्वयः। ९ अन्नकर्मभावव्युत्पत्तिभ्यां भक्षणशब्देनोक्तेऽकलंजभक्षणस्य वाचकशब्दः कलंजेति। ननु भक्षणव्यतिरिक्ताः स्पर्शादिक्रियापि कलंजेतन तु संकल्पः
वस्तु शंकते किं तद्भक्षणमिति। पविधावि वप्रतिषेधेपि प्रथमं संकल्प्य निवर्तते अतो विना नञा तत्वेनापरिच्छिन्नो विधिसंबंधयोग्यो भक्षणाभावो हेतुः संकल्पस्यैव नञ् दृश्यते नञ् स्पर्शनादिकं इत्याशयः। ननु प्रजापतिव्रते पुरुषावतः
नत्वोऽयुक्तो भवतीति फलश्रुतेः संकल्पो वि(न) धीयते नस्वरूपलाभश्रुतेरत आह संचेति। पर्वपक्षे प्रयोजनमाह अतएतेन पर्युदासे प्रजापतिव्रतवन्निलक्षणसंगः। तत्र हि नो दीतमिति किं यालक्षणविहितः शास्त्रस्य
योऽनीक्षणसंकल्प आदित्यादृश्यस्य निमित्त नामाह अतो नियततता। आर्थवादिकप्रनो निवृत्तिश्च फलं सर्वेषामर्पोदीतमितिफलतोप्यावश्यकता। अन्नदुनिमित्तार्थवादयोरभावात् स्वर्ग एव फलमिति काम्यत्वान्निका
मेर्थपेक्षकलंजं नञ्लक्षणोऽयमिति
संशयः। किं प्रजापतिव्रतवत् पर्युदासाश्रयणे नाभक्षणं तीव्रक्षणाभावसंकल्पः कल्प्यफलो विश्वजिदादिवद्विधीयते उत भक्षणप्र
तिषिध्यते प्रत्यवायपरिहारायेति। यदि नञ् विशिष्टं भक्षणं विधिना संबध्यते ततः पर्युदासः अथ नञ् विध्योः संबंधस्ततः प्रति
षेधः। तत्र। भक्षणस्य व्यवधानेन नञ् विध्योर्नास्ति संगतिः। भक्षणं तु नञा युक्तमव्यवायद्विधीयते। श्रुत्या च विधिसंबंधो भक्षणस्य
नञः पुनः। पदांतरत्वाद्वाक्येन श्रुतेर्वाक्यं दुर्बलं। तस्माद्भक्षणमेवेह नञा युक्तं विधीयते। तत्र भक्षणाभावो ननुष्ठेयत्वाद्
विधेय इति तद्धेतुः संकल्पो विधीयते। स चाश्रुतफलः कल्प्येन फलेन संबध्यते। अतः फलकामाधिकारमेवंजातीयकमिति
निष्कामानां याथाकाम्यं। अत्रोच्यते॥ ननु भक्षयत्योरेवं तु स्वार्थहानिः प्रसज्यते। संकल्पलक्षणाच्च श्रुतेरस्य तु बाधनं। भक्षणे
पुनः प्रत्यासत्तिमात्रं बंधानं। न वा तदपि किं तर्हि भक्षयेदिति पदं परिपूर्णं नञा संबध्यते नभक्षयेन्नेति। भक्षयेदिति वर्ज्य भक्षणभावनायां
प्रवर्त्तनागम्यते। नञा संबद्धेन विधिना तद्विपरीतनिवर्त्तनाप्रतीतिः। निवर्त्तना च निवृत्तिफलो व्यापारः। न च प्रेक्षापूर्वकारी पुरुषो रा सदसद्विवेचनी बुद्धिः प्रेक्षा॰
गतः प्रवर्त्तमानो सति प्रत्यवायफलत्वे निवर्त्तयितुं शक्यत इति श्रुतनिवर्त्तनान्यथानुपपत्त्या विषयीभूतभक्षव्यापारस्य प्रत्यवायफ
धर्मित्वं तत्र असत्युपहायप्रत्यासत्त्यारब्धधर्मबाधो युक्त एवेति मान्यथार्थः। पर्युदासपक्षे पदैकदेशत्वेनापर्यवसितार्थो धातुरर्थो ग्रैनञा न्वियात् तत्रायुक्तं। निषेधपक्षे तु पर्यवसितार्थयोरेव पदयोरन्वय इति परि
पूर्णपदमित्यनेनोक्तं। कलंजपदं तु कर्मत्वेन भक्षयतावेव प्रविष्टत्वेन व्यवधायकमिति भावः। नो दीतमित्यादौ तु तस्य व्रतमिति प्रक्रमादेतावता हेतु साऽयुक्तो भवति संते फलश्रवणाच्चेत्यर्थहानाद्यनौ कृत्या
विपर्युदासत्तेति वैषम्यं २

५
६१२

12

नञर्थविवर्जनं न हि प्रयस्य नियोगस्याहर्वास्य नियोज्यस्याकांक्षा यो शब्दोपस्थितः न लक्षणप्रवृत्तस्य नियोज्यस्यल ब्ध्यतादाकांक्षा निवृत्तेर्नानुपस्थितेः प्रत्यवायलक्षणतः प्रकल्प्यते स परिहारकामो नियोज्यः
कल्प्यवित्युपु का इत्यर्थः। तदिति। अकृतकार्यतानर्थानुपपत्तिरेव लक्षणेन वर्जनस्य प्रसक्ता। कर्तव्यमिति। यपरिहारो पायत्वेमानमिति भावः। सत्यमिति। सुखदुःखफल... परिहारफलत्वाभावे ममेदं
शा०६१२ कार्यमिति लक्षणप्रवृत्तोपि न बुध्यत इति भावः। लक्षणाप्रवृत्तस्य तद्वर्जने नियोगायोगः प्रमाणमिति चेत्तत्राह यदि हीति। एतावतैवेतदभावे नियोगायोगमात्रेण॥ जीवनशक्तिव्यतिरेकेण
नियोगायोगस्तयोरपि नियोज्यविशेषणतापत्तेर्न स्वर्गकाम नीतहि शेषणोक इत्यर्थः। यत्तु विश्वजिदादौ फलाभावे गांशोकरणोशेषविधेः प्रयुक्तिशक्तिः कल्पनीयेति गौरवं स्यात्। सति तु

रत्वे कल्प्यते॥ अतस्तत्परिहारायसर्वेषामेवंजातीयकं वर्ज्यं॥ ॥ येत्तु नञर्थविषयस्य नियोगस्य लक्षणाप्रवृत्तस्य नियोज्यस्य लब्धुत्वा
न्नप्रत्यवायकल्पनाप्रमाणवती स्यादुक्तं श्रुतार्थापत्तेः प्रमाणत्वोपपादनान्निरस्ताः। किंच लक्षणानञर्थविशेषणत्वेनोपक्षीणा
न नियोज्यविशेषणं आख्यातेन कर्तुरनभिधानात्। उभयविशेषणत्वे वाक्यभेदप्रसंगात्॥ ननु न ब्रूमः अस्या नियोज्यविशेषणत्वं नञ
र्थविशेषणस्यैवार्थान्नियोज्यविशेषणतामावक्ष्महे। लक्षणाप्रवृत्तपर्वहितदभावे नियोक्तुं शक्यते नान्यः॥ सत्यमेवं तथापि न
नियोज्यविशेषणत्वे लक्षणास्य प्रमाणमस्ति। यदि ह्येतावतैव नियोज्यविशेषणत्वमाश्रीयते ततः सर्वत्र जीवनशक्तिश्च नियोज्य
विशेषणं स्यातां। ततश्च तत्स्वच्छिन्नस्य नियोज्यस्य लब्धत्वाद्विश्वजिदादौ स्वर्गकामादेरकल्पनं स्यात्। तत्रय[illegible]रकेन विद्युद्यते
प्रयुक्तिलाघवाय फलकल्पनमिति तन्निषेधाधिकारेष्वपि समानमित्यास्तां तावत्॥ ५॥ तस्मिन्ननुतिष्ठमाने निजननेन प्रवर्तेरन्
स्मात्तो यमनियमाः प्राङ्मुखोन्नानीत न दक्षिणामुखो मुञ्जीतेत्येवमादयः। किं जनन प्रवृत्ति प्रवर्त्तन्ते जातो यदावा कुपानदेत्यर्थः।
उतोपनयनप्रवृत्तिर्वा इति संशये। जनन्निसाध्यत्वात् वीत्राकमात्राधिकारित्वप्राप्तेर्ब्रूमः उपनयनप्रवृत्तिस्युरिति। कुतः। स्मरणात्

दमं ग्रसाध्यत्वा १

इति शब्दः प्र[illegible] तस्यार्थः प्रागुपनय[illegible] नारक[illegible] नात्काम चारकामवादकामभक्षो इत्यादिस्मृतिप्रदर्शनार्थः अत एव स्मरतीति बहुवचनं। सुरापाणब्रह्महननादरूपजन्मतो न कार्यस्तथैव शिष्टस्मृते रित्यर्थः
नैमित्तिके चेति सत्यपि जीवने नानुष्ठानेन तन्निमित्तकता बाध्यते। सायमादिकालोऽशक्यत्वाद्यंश इत्याशयः। आवश्यकाहारविहारादिवत् एककालसांगेन सातत्यमिति स्फुचितं। वस्तुतस्तु न नैमित्तिके सायमादि कालविधिः
किंतु काम्ये तेन नांगलोपो पीति दर्वपक्षरहस्यं। अनुपादेयत्वेह तु तस्मिन्निति। कालरूपे कर्म विधीयते न तु कर्मणि कालइत्यर्थः। प्राप्तइति स्वयं सिद्धमाह। ननु जीवने निमित्ते सति नैमित्तिकानुष्ठानमावश्यकमिति न सा
यंकालादिप्रतीक्षोचितेतिशंका निरस्यति तु ततश्चेत्यत्र। कालशास्त्रानुरोधेन निमित्तसंकोचान्न केवले जीवने निमित्तइति भावः। प्रयोगविध्यननुष्ठाप्यत्वे नाग्निविद्ययोरपि कालवन्नैयथ्यार्थादुपबंध इत्याह एतेनेति॥

स्मरति हि उपनयनादि नियम इति। तस्मादुपनीताधिकारः॥६॥ अभ्यासोऽकर्मशेषत्वात्पुरुषार्थो विधीयते॥ यावज्जीवमग्निहोत्रं जु-
होति यावज्जीवं दर्शपूर्णमासाभ्यां यजेत इति श्रूयते। तत्र संशयः। किं सातत्येनानुष्ठानं उत सायंप्रातरग्निहोत्रं पौर्णमास्यमावास्य-
योश्च दर्शपूर्णमासाविति। तत्र जीवने निमित्ते कर्मविधानान्नैमित्तिके वासंजाविताग सांगस्य वैगुण्यात् कालस्य चांगत्वात् तल्लो-
पेन संततानुष्ठानं न्याय्यमिति प्राप्ते ब्रूमः। अंगत्वेपि च कालस्य न सांगोपांगवत्कुतः। अनुपादेयरूपत्वात्तस्मिन्कर्मविधिर्यतः।
यद्धि प्रयोगविधिवशादुपादेयं तद्धि यथाशक्त्युपबध्यते कालस्य पुनरनुपादेयत्वात्। एषा हि तत्र वचनव्यक्तिः। अस्मिन्का-
ले प्राप्ते कर्म कर्त्तव्यमिति। ततश्चाध्यात्तिकालमेव जीवने निमित्ते भवति न कालीतरेऽनुष्ठानमिति। एतेनाग्निविद्ये व्याख्याते॥ त-
योरप्यध्ययनाधानविधिसिद्धयोः स्वीकरणात् प्रयोगविधिनाऽनुष्ठाप्यत्वादेवाववनव्यक्तिरग्नीमान्विद्वांश्चाधिक्रियेतेति॥
प्रत्यक्षमेव च विद्यावतोऽधिकारश्रवणं यदेवं विद्वानग्निहोत्रमिति सर्वत्र च श्रवणा॥ तस्मात्काले प्राप्ते विदुषोऽग्निमतश्चांगीतराणि।
यथासंभवमुपसंहृत्यानुष्ठानं॥७॥ तेषामौत्पत्तिकत्वादागमेन प्रवर्त्तेत॥ ॥यदि कालशास्त्रानुरोधेन निमित्तसंकोचः ततः काल

शास्त्रस्य सकृदनुष्ठानेन संपादितत्वात्तद्ध्वंसो न सकृदेव सायंप्रातःकालयोः पौर्णमास्यमावास्ययोश्च कृतः शास्त्रार्थ इति न पुनः
पुनरनुष्ठातव्यं स्यात् नैवं। न हि कालवशाज्जीवनस्य निमित्तत्वं हीमते। किंतु तत्कालीनमेव जीवनं न कालांतरीयमित्येतावत्॥
ततश्च तादृशस्यैव जीवनस्य पुनःपुनरावृत्तौ शास्त्रमपि पुनःपुनर्नैमित्तिकपुरुषं नियुंक्ते। अतो निमित्तावृत्तावावृत्तिर्नैमित्ति
कानां॥ ८॥ तथा तः क्रतुसंयुक्तानि॥ ॥ युक्तं पुरुषार्थेषु नैमित्तिकेषु निमित्तावृत्तावावृत्तिरिति॥ तत्र हि प्रत्यावृत्ति फलमन्य
दन्यच्च निष्पत्स्यते॥ क्रत्वर्थेषु तु भेदनहोमादिषु क्रतूपकारकस्यैव साध्यत्वात् सकृत्कृतेनैव तत्सिद्धे रेकस्मिन्प्रयोगे भेद
नावृत्तावपि न होमावृत्तिरिति विशेषं मन्यमानस्योत्तरं। क्रत्वर्थेष्वपि शास्त्रतो निमित्तावृत्तावावृत्त्यवगमादावृत्तौ निमित्तस्यावृत्ते निमित्तस्यावृत्तावि
नैव होमेन सगुणः क्रतुः स्वफलाय पर्याप्नोतीति कल्पनादेषामपि निमित्तावृत्तावावृत्तिः॥ ९॥ आचाराद्व्यमालोषु तथास्यात्तत्पुरु त्यन्वयः ४
षार्थत्वात्॥ पूर्वानुगमनादीनां आचारप्रमाणकानां अनुगमनादिनिमित्तानां किं निमित्तावृत्तावावृत्तिः स्यान्नेति संदेहः॥ तत्र॥ क्रत्वर्थानामपि ३
दृष्टार्था ह्येते॥ अनुगमनाभ्युत्थानाभिवादनादिभिः प्रीतो गुरुः सम्यग्विद्यां तद्दातीति। तत्र यथा नुष्ठिते प्रीतिर्निर्वर्तितथा

अयं भावः। वीप्सार्थत्वात् वसंते विधीयते वा। नाद्यः अप्राप्तेः। नहि कर्मणा तेन वसंते विहितेन यावद्वसंतं अनुष्ठानं प्राप्नोति। न संगमस्तीति प्रधानानुष्ठानयुक्तं। नेतरः। पंचाहादिसाध्यत्वेन ज्योतिष्टोमस्य सर्ववसंतान्व्यापित्वादशक्य
विध्यापत्तेः। अतः सकलस्यावसंतस्य निमित्तत्वमेवावगम्यत इति। एवं च सति यावज्जीवनिमित्तं नैमित्तिकानुष्ठानप्राप्तेर्वीप्सार्थानुवाद इत्याह यावद्वसंतमिति। ननु वसंतत्वाको नैमित्तिकः प्रयोगो विधीयते किं तु काम्य एवाभ्यासो गुण
इति शंकते यावद्वसंतमिति। परिहरति। यजेतेति। अतोत्र नैमित्तिकप्रयोगवि- धिरित्याह तस्मादिति। नैमित्तिकत्वे चावश्यकता सिद्धा भवतीत्याह इतीति।

कर्त्तव्यं सकृद्वसंते दानत्ववत्प्रयमावर्त्तनीयमिति प्राप्ते निधीयते॥ दृष्टार्थेष्वपि नियमाददृष्टाभ्युपगमात्तस्य च शास्त्रप्रमाणा
कत्वात्तद्दर्शने निमित्तावृत्तावावृत्तिः॥१०॥ ब्राह्मणस्य सोमविद्याप्रजमृणवाक्येन संयोगात्॥११॥ सोमेन यजेत स्वाध्यायमधी
यीत प्रजामुत्पादयेदिति श्रुतं सोमविद्याप्रजं किं नित्यं नित्यमिति संशयः। तत्र यावज्जीवादितुल्यनिर्देशाभावान्न ज्योतिष्टो मुता३
मेन स्वर्गकामो यजेतेति च फलश्रवणाद्वसंते वसंते ज्योतिषा यजेतेति वास्य कालविधिपरत्वादध्ययन स्वर्गकामो यजेतेति प्रज
योस्तु विश्वजिद्वत्स्वर्गकल्पनात् सप्तमे ब्रह्मवर्चसकाम इत्येवमादीनां चोपनयनगतानां फलानामुपनयनस्याध्ययनांगत्वेन स्व
यं फलानपेक्षत्वादध्ययनफलत्वमेव न्याय्यं। अतः फलकामाधिकारत्वमेषामिति प्राप्ते निधीयते। नित्यानीति॥ कुतः। वीप्सानुक्तौ
वसंतो हि निमित्तत्वेन गम्यते॥ यावद्वसंतं नियमः सोमस्यातोवगम्यते। यावद्वसंतमभ्यासः काम्यस्यैवाथ नोद्यते। यजेतेति पदे
नैवं प्राप्नोत्यभ्यासलक्षणं। तस्माद्वसंते निमित्ते विधानादागतागते वसंते नियमेन सोमः कर्त्तव्य इति नित्यः। अध्ययनमप्यक्षतफ
लमक्षरग्रहणादिनाक्रमेणाधर्माधर्मावबोधफलत्वात्तस्य चावश्यकत्वादावश्यकं। ब्रह्मवर्चसादिकं त्वध्ययनांगभूतोपनयनाश्रित
उपलक्षणं चैतत्। आवश्यकजपयज्ञप्रायश्चित्तार्थपारायणाद्युपयोगिवेदावधारणार्थत्वाच्च फलत आवश्यतेति भावः१

स्थितेति तिष्ठद्वजे द्याति इत्यादि निमित्ततान मकसत्तस्युपेनश स्त्रीवशेनेत्यर्थः।२

जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति सर्वैतदृणं गोपदाय ब्रह्मचारी प्रजावानिति

यस्मिन्नपि जीवने कर्म क्रियमाणं तन्निमित्ततामेव जह्यात्। ततश्च यावज्जीवं यावज्जीवादिप्रधानचोदनाविरोधादंगविनियोग एव मा कश्चिद्विषयत्वेन संकोच्यः न त्वंगविनियोगानुरोधेन यावज्जीवादिप्रधानचोदनैव शक्तविषयत्वेन संकोच्या

स्याशयः। द्वितीय इत्यपरिष्णानि रस्तां निमित्तपरतां साधयतीत्यादि। न चोभयोद्देशो वाक्यभेदः। श्रुतवाक्यान्निमित्तान्वयमात्रपरावश्रुतानुमितैकदेशानिष्पन्नस्य महावाक्यस्य श्रुतार्थापत्तिकल्पितफलपदवत्सलत्

वस्तुतस्तु निमित्तनैकमेवस्वरूपेणान्वेति किंतु तस्य कर्तव्यतयास्मिन्सतीदं कर्तव्यमिति। फलं तु कर्मस्वरूपेणान्वेति। अतो निमित्तं फलमनुमन्यते। नहि निष्फले कश्चिदनुतिष्ठति निमित्तनाशे तेपि ते नो भयोरेकवाक्यसमवायसंबंधे श्रुति

सप्तवर्षादिगुणफलत्वादध्ययनफलमनाद्रीकनीयमेव। प्रजोत्सादनमप्यनर्थावफलश्रवणादनुत्साद्य तथा सुतानप्योगच्छतीति

प्रसवाय स्मरणादावश्यकं। तस्मान्नित्यमेव सोमविद्याप्रजं। ऋणापाकरणश्रुतिरपि सोमादीनामावश्यकत्वं दर्शयति॥ न च तत्र ब्राह्मण

श्रवणात्तद्विषयमेवावश्यकत्वं विधिवाक्येषु विशेषाश्रवणात्॥ ब्राह्मणग्रहणस्योपलक्षणार्थत्वात्॥॥ अतस्त्रयाणामप्यव

श्यकाः सोमादयः॥११॥ इति श्रीशास्त्रदीपिकायां षष्ठस्याध्यायस्य द्वितीयः पादः॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ सर्वशक्तौ प्रवृत्तिः स्या

त्तथाभूतोपदेशात्॥ यावज्जीवमग्निहोत्रं जुहुयात् यावज्जीवं दर्शपूर्णमासाभ्यां यजेत वसंते वसंते ज्योतिषा यजेतेति। किमत्र

सर्वांगोपसंहारेणाधिकारः उत यथाशक्तीति। शक्तो ह्युपसंहर्तुं तदा तावद्भिरुपेतं प्रधानं कुर्वन्नधिक्रियेतेति संशयः। तत्र समु

च्चितानामंगानामसिद्धाभावेन संग्रहः। सर्वांगयुक्तमेव ततः प्रधानं फलसाधनं। न चाफलसाधनेऽधिकारोऽस्तीति अतो न हीनांगस्य

प्रयोगः। उच्यते। नैमित्तिके नियोगेन कर्तव्यमेवगम्यते। निमित्तेन तत्तौ शक्यहानेनापि प्रयुज्यते। यावज्जीवोपबद्धं हि जीवने धा

तुसंबंधे विहितेन णमुलप्रत्ययेन संबंधांतरासंभवान्निमित्तत्वेन यागानुरक्तां भावनां प्रत्यवगम्यते। दर्शपूर्णमासयोरपि विधे १४

14

त्वचेति। अत्रैकदेशिनः फलं निमित्तो भयान्यथायोगादेव नैमित्तिके फलं नास्त्येवाश्रुतत्वात्। श्रुतत्वां निमित्तमेवान्येति। फलाभावाश्च पर्वीभावः अपर्व अश्रुत्वा येति कर्तव्यतेति स्थापितास्त्येव। यागकर्तव्यतोपपत्तेश्च वादेवुतमात्रमा
दर्शपौ. याग एव च तत्र भावो न तु यागः करणं। न च फलाभावे पुरुषत्वयोगाद्विधिवैयर्थ्यं। प्रत्यवायानुसत्तर्षे नतस्मिहेतोः। विहिताकरणाद्धि प्रत्यवायस्मरतः। नत्वेवमप्रत्यवायस्येव फलत्वात्कथमफलत्वोक्तिः इतरेतराश्रयात्।
विहिताकरणात्प्रत्यवायः प्रत्यवायपरिहारार्थश्च विधिरिति। अतो न निमित्तविधिः फलपरः। किं तु विहिताकरणस्य प्रत्यवायहेतुत्वेऽस्य स्या (पां ३) बोधितेऽकरणे सति अकरणरूपहेत्वभावादेव प्रत्यवायरूपकार्यं न भवतीति।
तन्निरासस्तु वर्षिक एव कृतः। विधृतश्चेतत्र रत्ने इत्याह। तीर्थेति। तदत्रास्माभिरपि भावज्ञो वाधिकरणे धर्मेण पापमपनुदतीत्यादिश्रुत्या - दिश्यमाणकपापक्षयकार्यत्वमेव सिद्धान्तयद्भिः निराकृतमिति तत्तदेवावधेयम्॥

षितश्चयजिः कालयोगिनामाग्नेयादीनामेव वावकोनांगानामिति। निमित्तस्यैवैतद्रूपं यत्तस्मिन्सति नैमित्तिकमवश्यं कर्तव्यं।
अतः प्रधानानुरक्तात्वनास्त्ववाक्यश्रुतनिमित्तवशाप्राप्तावश्यकत्वानुरोधेन यथासंभवमंगानि गृह्णाति। तावतैव च शास्त्रवशा
त्फलसिद्धिरिति यथाशक्तिप्रयोगेनैवाधिकारः। सर्वाङ्गन्यायस्तोत्ररत्ने न्यायरत्नमालायां च प्रपंचितः। नीर्थांतरं च निराकृतमित्युप
रम्यते॥१॥ काम्येषु चैवमर्थित्वात्॥ काम्यानि कर्माण्यैन्द्राग्नमेकादशकपालं निर्वपेदित्यादीन्युदाहरणं॥ प्रकृतावपि काम्यप्रयोगो
दाहरणमेव। तत्रापि किं यथाशक्तिप्रयोगेनाप्यधिकारः उत सर्वांगोपसंहारेणैवेति विचारः॥ तत्रासत्यपि निमित्ते प्रजाकामादि
शब्देरविशेषप्रतीतेरसमर्थानामप्यधिकार इति। स्थितेऽपि तीर्थगाधिकरणे पूर्वाधिकरणोपजनितांगलोपकालुष्यबुद्धिः काम्येऽपि वि
लोपं मन्यते। अत्रोच्यते॥ प्रजाकामादिशब्दाः समर्थेष्वपि विरुद्धाः॥ न च कामनानिमित्तत्वेनावश्यकत्वं शाब्दं स्यात्। अंगानि तु न्याय्यानि न
शक्यंते बाधितुं। नैमित्तिके पुनः शाब्दमावश्यकत्वं प्रधानस्येति तदविरोधेनांगानि यथाशक्ति गृह्यंत इति विशेषः॥२॥ क्रियमाणमाश्रितत्वा
द्रव्यांतरे विभागः स्यात्॥ ॥अतः परमतिप्रसंगनिराकरणेन नैमित्तिके स्थापितस्य यथाशक्तिप्रयोगस्य शेषत्वेन प्रतिनिधिविचारः

प्रत्यभिज्ञापि भ्रान्तिः स्यात् यदि क्रियायाः देवदत्तादिना सहास्यैता भेदः स्यान्न तु तदस्ती त्याह नहीति। भेदेऽपीति। एवं देवदत्तादिभेदेऽपि क्रियाया अभेदे दृष्टान्तेन प्रसाध्य तद्‌निरूपकद्रव्यभेदेऽपि सुतरां न क्रियाभेदः शब्दान्तरादि
भेदक प्रमाणाभावात् नैकप्रमाणमूलतायाः प्रत्यभिज्ञाया बाधकाभावादित्याह अत इति। न केवलं देवदत्तादिभेदे एव किं तु निरूपकस्यान्यद्रव्यभेदेऽपीति द्रव्यान्तरेऽपीत्यस्यार्थः ५

१५ प्रत्यभिज्ञायते। तदुपोद्घातत्वेन तदिदं चिन्त्यते। किं दर्शपूर्णमासादिषु नीवारादिद्रव्यान्तरं क्रियमाणं कर्मान्तरत्वमापादयति उत द्रव्यान्तरे
त२ ऽपि तदेव कर्मेति। यद्यन्यत्र तेनाप्रतिनिधिरयं देवतादिद्रव्यान्तरप्रतिनिधाय प्रयोक्तव्यं कर्मान्तरं। द्रव्यस्यैव क्रियानामरूपेनान्यत्वान्तरत
तः॥ तदात्मनश्च तद्भेदेन भवेद्भिन्नता कथं॥ उच्यते॥ तदात्मनोऽपि त्वस्यैव व्यतिरेकः क्रियानपि जातिवद्गुणवद्वा तस्तद्भेदेऽपि न घटोयं घटोयमनुवृत्तोयं शुक्लोयमिति प्रतीतेः २
भिद्यते। क्रियापि जातादिवद्देवदत्तादिभेदेऽपि यजति दर्शपूर्णमासावनुतिष्ठतीत्येवमेकबुद्धिवेदनीया न भेदं प्रतिपद्यते।
५त नैत्यस्मीतां भिन्नत्वं द्रव्यान्तरक्रियायाः येन देवदत्तभेदः स्यात्। भेदेऽपि त्वस्यैवानेकतामुपगमात्। अतो द्रव्यान्तरेऽपि क्रियाभेदाभा
वात् सिद्धः प्रतिनिधिः॥ ३॥ श्रुतिप्रमाणत्वाच्छिष्टाभावेऽनागमोऽन्यस्याशिष्टत्वात्॥ दर्शपूर्णमासयोः श्रुतद्रव्यापचारे द्रव्यान्तरं प्र
तिनिधाय प्रयोगः कर्तव्यो नेति विचारे। न कर्तव्य इत्याह इस वचनात्यधिकरणोऽन्त्राकस्यागत्या गत्यैकः। न पुनरर्थान्तरागमः॥ न चाद्र
व्यान्तरागमे प्रमाणमस्ति। कर्मचोदनानात्वत्तः नद्रव्यं प्रयुक्तैव तु द्रव्यस्य प्रयोजकं व्रीहिभिर्यजेतेति तत्र व्रीहीणामेव प्रयोजकत्वेना
न्यस्यातो नान्यागमः स्यादेवं यदि व्रीहिशास्त्रं द्रव्यस्य विधायकं स्यात्। कर्मचोदनया त्वाक्षिप्तं द्रव्यं व्रीहिशास्त्रेणानियम्यते।
व्रीहिशास्त्रं यद्यपूर्वविधिः प्रयाजादिविधिवत् स्यात् तदा तद्बाधशक्त्या प्रयोगन्यायेन तदभावेऽपि न द्रव्यान्तरागमः स्यादित्यर्थः। नियमविधिस्तु व्रीहिशास्त्रं स चाप्राप्तांशपूरणके तदाघ्रातिन्यक्षेकर्मविधि
नैव प्रापतः प्राप्तं द्रव्यं तदाधारे न व्याप्रियते यदा लोपतोऽप्राप्तं तदा विधत्त इत्यर्थः [illegible] १५
पूरण

यद्यत्वलाभाद्व्रीहीणामुपात्तेव्रीहिचोदना। कर्मशास्त्रं तदा द्रव्यमन्यदाक्षिपति ध्रुवं तस्मादस्ति प्रतिनिधिः॥४॥ न देवताग्निशब्द
क्रियमन्यार्थसंयोगात्॥ देवताग्न्यादिः। अग्निराहवनीयादिः। शब्दो मंत्रः। क्रिया प्रयाजप्रोक्षणादिरदृष्टार्थः॥ दृष्टार्थेषु त्ववघातादि
ष्वस्त्येव प्रतिनिधिः। न खनिर्लुंचनादिभिरपि तत्र कार्यसिद्धेः॥ तदेषां देवतादीनामपि विस्मरणादिना प्रचारे किं देवतान्तरमग्न्यन्तरं मन्त्रा
न्तरं क्रियान्तरं वा प्रतिनिधेयमुत नेति। पूर्वन्यायेन प्रतिनिधौ प्राप्ते निषिध्यते। यत्र हि प्रतिनिधीयमानं मुख्यस्य कार्यं साधयति तत्र
प्रतिनिधिर्न त्विह तथा संभवति। देवता तावद्धविर्लक्षणा न वान्यानीयमाना देवता भवति न वा देवतायां संकल्प्यमाने यागो भवति॥
